|| અણુભાષ્યમ ||

|| પ્રથમોઽધ્યાયઃ ||

નારાયણં ગુણૈઃ સર્વૈરુદીર્ણં દોષવર્જિતમ |
જ્ઞેયં ગમ્યં ગુરૂંશ્ચાપિ નત્વા સૂત્રાર્થ ઉચ્યતે || ૧ ||

વિષ્ણુરેવ વિજિજ્ઞાસ્યઃ સર્વકર્તાઽઽગમોદિતઃ |
સમન્વયાદીક્ષતેશ્ચ પૂર્ણાનંદોઽંતરઃ ખવત || ૨ ||

પ્રણેતા જ્યોતિરિત્યાદ્યૈઃ પ્રસિદ્ધૈરન્યવસ્તુષુ |
ઉચ્યતે વિષ્ણુરેવૈકઃ સર્વૈઃ સર્વગુણત્વતઃ || ૩ ||

સર્વગોઽત્તા નિયંતા ચ દૃશ્યત્વાદ્યુજ્ઝિતઃ સદા |
વિશ્વજીવાંતરત્વાદ્યૈર્લિંગૈઃ સર્વૈર્યુતઃ સ હિ || ૪ ||

સર્વાશ્રયઃ પૂર્ણગુણઃ સોઽક્ષરઃ સન હૃદબ્જગઃ |
સૂર્યાદિભાસકઃ પ્રાણપ્રેરકો દૈવતૈરપિ || ૫ ||

www.yousigma.com

જ્ઞેયો ન વેદૈઃ શૂદ્રાદ્યૈઃ કંપકોऽન્યશ્ચ જીવતઃ |
પતિત્વાદિગુણૈર્યુક્તસ્તદન્યત્ર ચ વાચકૈઃ || ૬ ||

મુખ્યતઃ સર્વશબ્દૈશ્ચ વાચ્ય એકો જનાર્દનઃ |
અવ્યક્તઃ કર્મવાક્યૈશ્ચ વાચ્ય એકોऽમિતાત્મકઃ || ૭ ||

અવાંતરં કારણં ચ પ્રકૃતિઃ શૂન્યમેવ ચ |
ઇત્યાદ્યન્યત્રનિયતૈરપિ મુખ્યતયોદિતઃ |
શબ્દૈરતોऽનંતગુણો યચ્છબ્દા યોગવૃત્તયઃ || ૮ ||

|| ઇતિ શ્રીમદાનંદતીર્થભગવત્પાદાચાર્યવિરચિતે બ્રહ્મસૂત્રાણુભાષ્યે પ્રથમોऽધ્યાયઃ ||

www.yousigna.com